# Bhishmaproktam Vishnu Stotram

# ભીષ્મપ્રોક્તં વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Bhishmaproktam Vishnu Stotram

File name : bhIShmaproktaMviShNustotram.itx

Category : vishhnu, vishnu, mahAbhArata, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | bhIShmaparva | adhyAya 64/2-8||

Latest update : November 2, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 2, 2025

*sanskritdocuments.org*

# ભીષ્મપ્રોક્તં વિષ્ણુસ્તોત્રમ્

ભીષ્મ ઉવાચ ।
શ ૃણુ ચેદં મહારાજ બ્રહ્મભૂતસ્તવં મમ ।
બ્રહ્મર્ષિભિશ્ચ દેવૈશ્ચ યઃ પુરા કથિતો ભુવિ ॥ ૧॥

સાધ્યાનામપિ દેવાનાં દેવદેવેશ્વરઃ પ્રભુઃ ।
લોકભાવનભાવજ્ઞ ઇતિ ત્વાં નારદોઽબ્રવીત્ ।
ભૂતં ભવ્યં ભવિષ્યં ચ માર્કણ્ડેયોઽભ્યુવાચ હ ॥ ૨॥

યજ્ઞાનાં ચૈવ યજ્ઞં ત્વાં તપશ્ચ તપસામપિ ।
દેવાનામપિ દેવં ચ ત્વામાહ ભગવાન્ભૃગુઃ ।
પુરાણે ભૈરવં રૂપં વિષ્ણો ભૂતપતેતિ વૈ ॥ ૩॥

વાસુદેવો વસૂનાં ત્વં શક્રં સ્થાપયિતા તથા ।
દેવદેવોઽસિ દેવાનામિતિ દ્વૈપાયનોઽબ્રવીત્ ॥ ૪॥

પૂર્વે પ્રજાનિસર્ગેષુ દક્ષમાહુઃ પ્રજાપતિમ્ ।
સ્રષ્ટારં સર્વભૂતાનામઙ્ગિરાસ્ત્વાં તતોઽબ્રવીત્ ॥ ૫॥

અવ્યક્તં તે શરીરોત્થં વ્યક્તં તે મનસિ સ્થિતમ્ ।
દેવા વાક્સમ્ભવાશ્ચેતિ દેવલસ્ત્વસિતોઽબ્રવીત્ ॥ ૬॥

શિરસા તે દિવં વ્યાપ્તં બાહુભ્યાં પૃથિવી ધૃતા ।
જઠરં તે ત્રયો લોકાઃ પુરુષોઽસિ સનાતનઃ ॥ ૭॥

એવં ત્વામભિજાનન્તિ તપસા ભાવિતા નરાઃ ।
આત્મદર્શનતૃપ્તાનામૃષીણાં ચાપિ સત્તમઃ ॥ ૮॥

રાજર્ષીણામુદારાણામાહવેષ્વનિવર્તિનામ્ ।
સર્વધર્મપ્રધાનાનાં ત્વં ગતિર્મધુસૂદન ॥ ૯॥

એષ તે વિસ્તરસ્તાત સઙ્ક્ષેપશ્ચ પ્રકીર્તિતઃ ।

કેશવસ્ય યથાતત્ત્વં સુપ્રીતો ભવ કેશવે ॥ ૧૦॥

ઇતિ મહાભારતે ભીષ્મપર્વણિ ૬૪ અધ્યાયાન્તર્ગતં
ભીષ્મપ્રોક્તં વિષ્ણુસ્તોત્રં સમ્પૂર્ણમ્ ।

મહાભારત । ભીષ્મપર્વ । અધ્યાય ૬૪/૨-૮॥

mahAbhArata . bhIShmaparva . adhyAya 64/2-8..

Proofread by PSA Easwaran

*Bhishmaproktam Vishnu Stotram*
pdf was typeset on November 2, 2025

Please send corrections to *sanskrit@cheerful.com*